**Sahitya Manthan**
A Peer-Reviewed, Open Access e-journal
ISSN: 2582 6867, Website: http://www.sahityamanthan.in
Year-1, Issue-4, Continuous Issue-4, November-December2020

# वैदिकवाङ्मये शैक्षिकतत्त्वानि

वेणुधरदाशः
शोधच्छात्रः (वेद-विभागः)
ज.रा.राजस्थान संस्कृत विश्वविद्यालयः
जयपुरम् (राज.)
मो.नं-8696957778
ई.मेल-benudhardash94615@gmail.com

व्याकरणशास्त्रे शिक्षेति शब्दस्य त्रिधाव्युत्पत्तिर्दृश्यते भ्वादिगणीयः शिक्षा विद्योपादने इत्यस्माद्धातोः, स्वादिगणीयः शक्लृशक्तौ इत्यस्माद्धातोः, दिवादिगणीयः शक् इत्यस्माच्च धातोः मर्षणेच्छाविशेषार्थे। शिक्षणं शिक्षा इति ऋग्वेदस्य पञ्चममण्डले एकोनषष्टितमे सूक्ते वर्णितम्-

**वयो न ये श्रेणीः पप्तुरोजसान्तान्दिवो बृहतः सानुनस्परि ॥**[i]

उत्तमशिक्षया क्षिप्रमेव कल्याणं जायतेति स्पष्टम्। इतोऽपि ऋग्वेदे वर्णितम् अस्ति-

**ते अज्येष्ठा अकनिष्ठास उद्भिदोऽमध्यमासो महसा वि वावृधुः॥**[ii]

मानुषेषु कनिष्ठमध्यमोत्तमा जनाः शिक्षायुताः भूत्वा राष्ट्रस्योन्नतिं कुर्वन्त्विति । गीतायामपि अष्टादशतमेऽध्याये सात्विकज्ञानस्योल्लेखो वर्तते यथा-

**सर्वभूतेषु येनैकं भावमव्ययमीक्षते। अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्विकम् ॥**[iii]

यया सर्वभूतेषु समभावो जायते सैव शिक्षेति स्पष्टमनेन। एवमेव गीतायाः पञ्चदशतमेऽध्याये विवेकयुतस्य जनस्य स्वरूपं वर्णितम्-

**उत्क्रामन्तं स्थितं वापि भुञ्जानं वा गुणान्वितम्। विमूढानानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः॥**[iv]

गीतायाः चतुर्थाऽध्याये ज्ञानस्य पावकत्वं प्रतिपादयति भगवान् कृष्णः-

**न हि ज्ञानेन सदृशं पवित्रमिह विद्यते। तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥**[v]

अर्थात् शुद्धान्तःकरणयुतः जनः आत्मनि ज्ञानं स्थापयति। वैशेषिकदर्शने-**यतोऽभ्युदय निःश्रेयस सिद्धिः स धर्मः** इत्यनेन धर्मलक्षणेन निःश्रेयसत्वम् अभ्युदयश्च शिक्षया एव जायेते। ईशोपनिषदि उक्तम्-

**अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥**[vi]

अर्थात् विद्यया एव अमरत्वस्यावाप्तिर्भवतीति स्पष्टमेव। एवमेव- **सा विद्या या विमुक्तये, ऋते ज्ञानान्न मुक्तिः** इत्यादिभिः उपनिषद्वचनैः शिक्षा जीवनस्य अधिष्ठात्री, पोषयित्री, मोक्षदायिनी च वर्तते । भगवानशङ्कराचार्यः ब्रवीति यत्- **सा शिक्षा या ब्रह्मगति प्रदा**। इत्येवं शिक्षा वास्तविकसुखस्य जनयित्री वर्तते, वास्तविकं सुखन्तु मानसिकमेव। उक्तञ्च पञ्चदश्याम्-

**मन एव मनुष्याणां कारणं बन्धमोक्षयोः॥**[vii]

इत्थं शिक्षा मानवानां जीविकोपार्जने साहाय्यम् करोति, मानवं सुसंस्कृतं सभ्यं च विधाय सांस्कृतिकमुत्कर्षं सम्पादयति । छात्रेषु शम-दमादि गुणयुक्तत्वं प्रतिपादयितुमाचार्य एवास्ति । मन्त्रसंहितायान्तु जन्मदातुरपेक्षया ज्ञानप्रदाता श्रेष्ठो भवतीति प्रतिपादितम्। यथोक्तम्-

**उत्पादक-ब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता। स वा अयमात्मा वाङ्मयो मनोमयः प्राणमयः॥**

इति उपनिषद्वाचा मन-प्राण-वाचां समष्टिरेव आत्मेति फलतश्च मनसा, वाचा, कर्मणा च शिक्षार्जनमेव वास्तविकी शिक्षा इति।

**शिक्षोद्देश्यानि-**

अधीति-बोध-आचरण-प्रचारणमिति अर्थात् आदौ शोधः ततो बोधः प्रबोधश्चाप्यनन्तरमित्ययं क्रमो वर्तते शिक्षायाः। अथर्ववेदे वर्णितम्-

**वर्धयैनं ज्योतयैनं महते सौभगाय । संशितं चित् सं तं रसं शिशाधि ॥**

अर्थात् सौभाग्ययुतजीवनसम्पादनम् सर्वांगीणविकासश्च उद्देश्ये प्रतिपादिते शिक्षायाः । तत्रैव अथर्ववेदे-

**तपस्तप्यामहे श्रुतानि शृण्वन्तः सुमेधसः॥**

अर्थात् तपसा वेदानधीत्य शतं जीवेमेत्युल्लिखितम् । वैदिकवाङ्मयेषु सदाचारस्य शिक्षा, चरित्रनिर्माणञ्च शिक्षायाः परमोद्देश्ये आस्ताम् । यजुर्वेदे उक्तम्-

**इदमहम् अनृतात् सत्यमुपैमि ॥**

वस्तुतः ज्ञानकर्मणो समुच्चयेन मोक्षाधिगमो भवतीति स्पष्टमेव । अध्यात्म-ज्ञानमीश्वरे प्रत्ययः शारीरिक-वाचिक-मानसिक-हार्दिक-बोद्धिक-समुन्नति इत्यादीन्युद्देश्यानि शिक्षायाः वर्तन्ते । ऋग्वेदे उल्लिखितमस्ति-

**मनुर्भवजनया दैव्यं जनम् ॥**[viii]

अर्थात् दैवीयगुणानामाधानपुरस्सरं दैवं जनय इति । स्ववलम्बनभावना, उत्तरदायित्वभावना, परिस्थितिषु कार्यसम्पादनक्षमता चोत्पादयितुमत्र अवसरो भवति ।**स्वस्थे शरीरे स्वस्थं मनः** मोक्षावाप्तिर्साधकञ्च ज्ञानं शिक्षाया प्रमुखोद्देश्यं वर्तते । ज्ञानप्राप्तये सात्विकी बुद्धिर्भवेदिति । केवलं शास्त्रज्ञानमेव पर्याप्तं नास्त्यपितु तदनुसारिणी क्रियापि स्यात् उक्तम्-

**शास्त्राण्यधीत्यापि भवन्ति मूर्खाः । यस्तु क्रियावान् पुरुषः स विद्वान् ॥**

अर्थात् उद्योगिनं पुरुषमेव लक्ष्मी तनोति । स्वानुभूतशक्त्या सफलता-माप्नोति च महाभाष्यकारेणोक्तम्-

**समानमीहमानानां चाधीयानानां च केचिदर्थैर्युज्यन्ते, अपरे न ॥**

**आचार्यस्य गुणाः-**

आचार्यः कस्मात्,**आचार्य आचारं ग्राहयति आचिनोत्यर्थान् आचिनोति बुद्धिमिति वा**[ix]इति निरूक्तकारः प्रतिपादयति । ऋग्वेदे अथर्ववेदे च आचार्यस्य गुणानां विषये उल्लिखितमस्ति- **वेधां अदृप्तो अग्निर्विजानन्, ऊधर्न गोनां स्वाद्मा पितूनाम् । पिता पुत्रः सन् ॥**[x] इति । अथर्ववेदे च **आचार्यो ब्रह्मचारी**[xi] । आचार्य शिष्यस्य जीवनस्य चरित्रस्य च निर्माणं कृत्वा वास्तविकमानवं सम्पादयति ।**ऋषयो भूतकृतः**[xii] इति अथर्ववेदे वर्णितम् । आचार्यस्य बुद्धावनन्तं ज्ञानं वर्तते अतः सः ज्ञाननिधिरस्तीति अथर्ववेदे उक्तम्- **गुहानिधी निहितौ ब्राह्मणस्य**[xiii] । आचार्यः ज्ञानचक्षुर्युतो भवतीति ऋग्वेदे वर्णितम्- **तृतीयेन ज्योतिषा सं विशस्व**[xiv] । **गूढज्योतिः पितरो अन्वविन्दन्**[xv] । आचार्ये विचक्षणतापि भवतीति पुनः ऋग्वेदे वर्णितमस्ति- **ऋषिर्विप्रो विचक्षणः**[xvi]। सः आचार्यः कविम् अद्वयन्तम्, **प्रचेतसम् अमृतं सुप्रतीकम्**[xvii] इति स्यात् । मनुस्मृतावपि उच्यते- **आचार्यो ब्रह्मणोमूर्तिः पितामूर्तिः प्रजापतेः**[xviii]। आचार्य स्वशिष्येषु कर्मठता विकासयेत् कार्याणि प्रति रूचिञ्चोदपादयेत् । ऋग्वेदे उक्तम्- **शिक्षमाणस्य देवक्रतुं दक्षं वरुणं सं शिशाधि**[xix] इति ।

**छात्रस्य योग्यता-**

**सह ना ववतु सह नौ भुनक्तु सह वीर्यं करवावहै ।**
**तेजस्विनावधीतमस्तु मा विद्विषावहै॥**[xx]

गुरुशिष्ययोः चित्तैकतायै निर्दिश्यते भारतीयदर्शने । गुरोराशीर्वादेनैव ज्ञानं प्रथते शिष्येति, अतः ऋग्वेदे उल्लिखितम्- **शिशीहि मा शिशयं त्वा शृणोमि**[xxi] । सः वेदोल्लिखितवृत्या वर्तयेदिति- **सं श्रुतेन गमेमहि, मा श्रुतेन विराधिषि**[xxii]इत्यथर्ववेदश्रुतिः प्रमाणम् । जिज्ञासवः छात्राः एव सूक्ष्मातिसूक्ष्ममपि ज्ञानं प्राप्नुवन्तीति **तान् उशतो विबोधय**[xxiii] इति ऋग्वेदश्रुतिः। ब्रह्मचर्यस्य सेवनंछात्रस्यानिवार्ययोग्यता वर्तते यतोहि- **ब्रह्मचर्येण तपसा देवा मृत्युमुपाघ्नत**[xxiv] इति अथर्ववेदे विवेचितम् । गुरोः सत्कर्मैवाअनुकरणीयं छात्रेणेति, आचार्यः तैत्तिरियोपनिषदि प्रतिपादितम्-**यान्यस्माकं सुचरितानि, तानि त्वयोपास्यानि नो इतराणि**[xxv] । वर्चस्वान्, ओजिष्ठः, भ्राजिष्ठश्च भवेच्छात्रः श्रमस्तपश्च छात्रस्य शस्त्रद्वयम्, तपः श्रमाभ्यां सर्वलोकं छात्रः पुष्णाति ।

**छात्रशिक्षकयोर्सम्बन्धः-**

उत्तररामचरिते भवभूतिना प्रतिपादितम्-

**वितरति गुरूः प्राज्ञे विद्यां यथैव तथा जडे,**
**न तु खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा।**
**भवति हि पुनर्भूयान् भेदः फलं प्रति तद्यथा,**
**प्रभवति शुचिर्बिम्बग्राहे मणिर्न मृदादयः॥**[xxvi] इति

आपस्तम्बधर्मसूत्रे वर्णितमस्ति **स विद्यातस्तं जनयति तत् श्रेष्ठं जन्म । शरीरमेव मातापितरौ जनयतः।**[xxvii] अर्थात् बालकाय द्विजत्वमाचार्य एव सम्पादयति। गुरोः दीर्घायुष्याय छात्राः परमात्मानं निवेदयन्तीति अथर्ववेदे उल्लिखितम्-

**आयुरस्मासु धेहि अमृतत्वमाचार्यस्य ।**[xxviii]

केचन शिष्याः दुर्बुद्धिनोऽपि भवन्ति स्म । तेभ्यश्च निरूक्तकारः कथयति-

**अध्यापिता ये गुरूं नाद्रियन्ते, शिष्या वाचा मनसा कर्मणा वा ।**
**यथैव ते न गुरोर्भोजनीयाः तथैव तान् न भुनक्ति श्रुतं तत् ॥**[xxix]

तैत्तिरीयोपनिषद्यपि गुरू-शिष्यसम्बन्धमाश्रित्य प्रोच्यते-**आचार्यः पूर्वरूपम्। अन्तेवास्युत्तररूपम् । विद्यासन्धिः। प्रवचनं सन्धानम्**इति अधिविद्यम्। इत्यनेन प्रकरेण भारतीयदर्शने छात्रशिक्षकयोरभेदत्वं प्रतिपादितं छात्रस्य शिक्षकः एव सर्वस्वमिति च वर्णितम् ।

**पाठ्यक्रमः-**

छान्दोग्योपनिषदि उल्लिखितम्- **ऋग्वेदं भगवोऽध्येमि, यजुर्वेदं सामवेदम् आथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यं राशिं निधिं वाकोवाक्यमेकायनं देवविद्यां, ब्रह्मविद्यां, भूतविद्यां, क्षत्त्रविद्यां, नक्षत्रविद्यां, सर्पदेवजनं विद्यामेतद् भगवोऽध्येमि**[xxx] इति ।

अर्थक्रियाकारित्वगुणवती शिक्षैव फलवती भवतीतिनिश्चप्रचम्वैदिककालीन शिक्षापाठ्यक्रमे सत्य-ब्रह्मचर्य-स्वाध्याय-देशभक्ति-ईश्वरविश्वासादि सद्गुणानां प्रतिष्ठापनार्थं यतते आचार्यः।

**शिक्षणविधयः-**

उपनयनसंस्कारान्ते गुरोः सन्निधौ शिष्यः तिष्ठति । छात्रस्य भोजनावासादि सर्वविधं सौविध्यम् आचार्यः एव सम्पादयति स्म । आचार्यः स्वशिष्याय संकल्पं कारयति यथोक्तं यजुर्वेदे-**अग्ने व्रतपते व्रतं चरिष्यामि, तच्छकेयं तन्मे राध्यताम् इदमहम् अनृतात् सत्यम् उपैमि**[xxxi] । अनन्तरं गायत्री मन्त्रेण दीक्षयति । यथोक्तं यजुर्वेदे-

**व्रतेन दीक्षामाप्नोति, दीक्षयाऽऽप्नोति दक्षिणाम् ।**
**दक्षिणा श्रद्धामाप्नोति, श्रद्धया सत्यमाप्यते ॥**[xxxii]

इत्येवं प्रकारेण व्रतस्योपसेवनात्परं नि रमय इत्येननाथर्ववेदोक्तेन वचनेन रोचकं रम्यं च विषयप्रतिपादनशैलीमाश्रित्याचार्यः कथाभिः आख्यानैश्च परमतत्त्वस्य विवेचनं करोति । अर्थात् कथाविधिः, दृष्टान्तविधिश्च आरम्भे स्वीक्रियेते । केनोपनिषदस्यानुपममुदाहरणं वर्तते यत्र यक्षकथया ब्रह्मणः स्वरुपमुपस्थापितम् । वाद-विवादविधिरपि अत्र समाश्रितः यजुर्वेदे **प्रश्निनम् अभि प्रश्निनमिति**[xxxiii]श्रुत्या स्पष्टमेव । विषयं रोचकं कर्तुं प्रश्नोत्तरविधेरनुप्रयोगः नास्त्यभिनवः अथर्ववेदे उक्तम्- **पाशं प्रतिपाशो जहि**[xxxiv] । यजुर्वेदे च **मर्यादायै प्रश्नविवाकम्**[xxxv] इति वर्णितम् । परियोजनाविधिः (Project Method) इत्यपि भारतीयदर्शने वर्तते । ऋग्वेदे वर्णितम्- **धिय आ तनुध्वम्, नावम्, कृणुध्वम्, इष्कृणुध्वम्, आयुधारं कृणुध्वम्**[xxxvi] इति । कृत्वाधिगमविधिरपि यजुर्वेदे वर्णितः- **स्वयं वाजिन् तन्वं कल्पयस्व, स्वयं यजस्व स्वयं जुषस्व**[xxxvii] इति । व्याख्यान-विधिः, स्वाध्यायविधिः, प्रवचनविधिश्चापि वर्तन्ते ।**स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यमिति** तैत्तरियोपनिषदि वर्णितमेव ।व्याख्यानविधेरनुप्रयोगो दृश्यते । व्याख्यानविधेश्च स्वरुपमित्थमस्ति-

**पदच्छेदः पदार्थोक्तिः विग्रहवाक्ययोजना । आक्षेपोऽथ समाधानं व्याख्यानं षडविधं स्मृतम् ॥**

इत्यनेन प्रकारेण विषयानुगुणं विधीनाश्रयनं कृत्वा अध्ययनाध्यापनं प्रचलति। सर्वेऽपि विधयः ये अधुना श्रूयन्ते तेषामुल्लेखो वेदेषु वर्तते । अनध्यापनस्य विषयेऽपि आपस्तम्बश्रौतसूत्रे वर्णनं वर्तते- **नाभ्रे, न छायायां, न पर्यावृत्ते आदित्ये, न हरितयवान् प्रेक्षमाणो, न ग्राम्यस्य पशोरन्ते, नारण्यस्य, नापाम् अन्ते** इति[xxxviii] ।

इत्थं भारतीयदर्शने शैक्षिकविवेचनं बहुशः कृतं वर्तते । आचार्यस्य प्रतिबिम्बवत् शिष्यो भवति । अज्ञानावृत्तमपाकृत्य आत्मसाक्षात्कारार्थं प्रचोदयति आचार्यः। अनुभवाधारित शिक्षणेन साकं शिष्याय लौकिकं

पारलौकिकञ्चेति सर्वविधं ज्ञानं दीयते स्म । दीक्षान्ते च अन्तेवासिनमाचार्यः अनुशास्ति- सत्यं वद । धर्मं चर । सत्यान्न प्रमदितव्यम् । धर्मान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम् । स्वाध्याय-प्रवचनाभ्यां न प्रमदितव्यम् इति । आचार्यः शिष्यस्य शारीरिक-मानसिक-बौद्धिक-नैतिकविकासान् सम्पाद्य तस्य व्यक्तित्वे पूर्णतामादधातीति शम् ।

**सन्दर्भग्रन्थसूची-**


1. अथर्ववेद संहिता (सायणभाष्य)- पं.रामस्वरूप शर्मा गौड, चौखम्बा विद्या भवन, वाराणसी, 2011
2. ऋग्वेद संहिता (सायणभाष्य)- विश्वबन्धु, विश्वेश्वरानन्द वैदिक रिसर्च इन्सिटीट्यूट, होशियारपुर, 1961
3. गोपथ ब्राह्मण- राजेन्द्रलाल मित्र एवं एच.विद्याभूषण, कलकत्ता 1862
4. यजुर्वेद- श्री राम शर्मा आचार्य, संस्कृति संस्थान, बरेली 1969
5. निरुक्त- पं.छज्जूराम शास्त्री, मेहरचन्द लक्ष्मणदास, दिल्ली 1963
6. मनुस्मृति- हिन्दी अनुवादक, श्री हरगोविन्द शास्त्री, चौखम्बा संस्कृत सीरीज, बनारस 1952
7. वैदिकवाङ्मयस्य इतिहास2012 जयपुर ,आयुर्वेद प्रकाशन ,शम्भु कुमार झा.डॉ -
8. वैदीकसम्पत्ति -रघुनन्दन शर्मा ,चैखम्बा 2015
9. आपस्तम्ब धर्मसूत्र1939 वाराणसी ,चौखम्बा ,उमेशचन्द्र पांडेय.डॉ-


[i]ऋग्वेद.५-५९-७

[ii]ऋग्वेद.५-५९-६

[iii]श्रीमद्भागवद्गीता.१८-२०

[iv]श्रीमद्भागवद्गीता.१५-१०

[v]श्रीमद्भागवद्गीता.४-३८

[vi]ईशोपनिषद.११

[vii]अमृतबिन्दूपनिषद्

[viii]ऋग्वेद.१०-५३-६

[ix]निरूक्त.५-४

[x]ऋग्वेद.१-६९-१,२

[xi]अथर्ववेद.११-५-१६

[xii]अथर्ववेद.६-१०८-४

[xiii]अथर्ववेद.११-५-१०

[xiv]ऋग्वेद.१०-५६-१

[xv]ऋग्वेद.७-७६-४

[xvi]ऋग्वेद.९-१०७-७

[xvii]ऋग्वेद.३-२९-५

[xviii]मनुस्मृति.२-२२६

[xix]ऋग्वेद.८-४२-३

[xx]तैत्तरीयोपनिशद.२-१-२

[xxi]ऋग्वेद.१०४२-३

[xxii]अथर्ववेद.१-४

[xxiii]ऋग्वेद.१-१२-४

[xxiv]अथर्ववेद.११-५-१९

[xxv]तैत्तरियोपनिषद,१-११-२

[xxvi]उत्तररामचरितम्.२-४

[xxvii]आपस्तम्बधर्मसूत्र.१-१-१५,१७

[xxviii]अथर्ववेद.१९-६४-४

[xxix]निरूक्त.२-४

[xxx]छान्दोग्योपनिषद्.७-१२

[xxxi]यजुर्वेद.१-५

[xxxii]यजुर्वेद.१९-३०

[xxxiii]यजुर्वेद.३०-१०

[xxxiv]अथर्ववेद.२-२७-१

[xxxv]यजुर्वेद.३०-१०

[xxxvi]ऋग्वेद.१०-१०१-२

[xxxvii]यजुर्वेद.२३-१५

[xxxviii]आपस्तम्ब श्रौतसूत्र.१५-२१-८